International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 83-85
© 2025 IJMH
www.themultijournal.com

Received: 09-10-2025
Accepted: 21-10-2025
Publish : 22-10-2025

**डॉ. विश्वामित्र राय**
अतिथि प्राध्यापकः, (शिक्षाशास्त्रविभागः),
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः,
उज्जयिनी, मध्यप्रदेशः, भारतम्

**Correspondence:**
**डॉ. विश्वामित्र राय**
अतिथि प्राध्यापकः, (शिक्षाशास्त्रविभागः),
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः,
उज्जयिनी, मध्यप्रदेशः, भारतम्

# शिक्षा : प्राचीनपरिप्रेक्ष्ये आधुनिकपरिप्रेक्ष्ये च

**डॉ. विश्वामित्र राय**

**शोधसारः -** शिक्षा मानवजीवनस्य आधारस्तम्भः अस्ति। सा केवलं पठितुं लेखितुं च न प्रयोज्यते, अपि तु उत्तमं जीवनं यापनाय मूल्यवान् साधनं भवति। शिक्षा विवेकं, नैतिकतां, सदाचारं च जनयति। सा अज्ञानान्धकारात् ज्ञानप्रकाशं प्रति नयति। शिक्षया मनुष्यः आत्मविश्वासयुक्तः, कर्तव्यनिष्ठः, समाजोपयोगी च भवति। अतः जीवनस्य सर्वेषु क्षेत्रेषु शिक्षायाः परमं महत्वं अस्ति। अतः "सा विद्या या विमुक्तये" इत्युक्तिर्न तु केवलं लोकोक्तिः अपि तु सत्यं जीवनसन्देशः इत्यपि वक्तुं शक्यते। अस्या शिक्षायाः दशा प्राचीनभारते कथमासीत् अद्य कथमस्तीति विचारः अस्मिन् शोधप्रबन्धे क्रियमानोऽस्ति।

**कुञ्चीशब्दाः –** शिक्षा, शिक्षानीतिः, गुरुः, शिष्यम्, मूल्यबोधः।

## भूमिका -

धर्मार्थकाममोक्षरूपाणां चतुष्टयानां पुरुषार्थानाम् उपलब्धये जन्तवः चेतनतया अज्ञाततया वा सततं प्रयासरताः इति निश्चप्रचयम्। पुरुषार्थलाभाय सर्वश्रेष्ठः सुकरश्च मार्गः विद्योपार्जनं शिक्षालाभश्च। तस्मात् भारते वर्षे प्राचीनकालादेवारभ्य विद्यायाः गुरुत्वं सर्वश्रेष्ठं वर्तते। शिक्षाशब्दः शिक्ष विद्योपादाने[1] इति धातोः निष्पन्नः विद्यारूपार्थस्य ग्राहकः। प्राचीनकाले शिक्षार्थिनामुद्देश्यं स्पष्टं तथा तेषां दिशा निश्चिता आसीत्। तत्काले अमृतत्वेन परिकल्प्य विद्या अधीयते स्म। उक्तञ्च ईशा-वास्योपनिषदि – विद्ययामृतमश्नुते[2] इति। अत्र अमृतत्वं नाम जन्ममृत्युरूपसंसारजातदुःखरूपान्मुक्तिः। अतः तत्काले विद्यार्जनममृतत्वलाभपरकमासीत्।

## प्राचीनकाले अध्यापकानां स्वरूपम् -

वैदिककाले तपःप्रभावेन ऋषयः मन्त्रदृष्टत्वेन स्वयं विद्यां जानन्तो अन्यान् उपदेशेन शिक्षयामासुः। इत्थं गुरुशिष्यपरम्परा प्रारब्धा। द्वे विद्ये वेदितव्ये परा चैवापरा च[3] इति उपनिषदुक्तेः ज्ञायते यत् विद्यायाः परा अपरा चेति विभागद्वयेन द्वौ विभागौ स्तः। अथ परा यया तदक्षरमधिगम्यते इति परमपुरुषस्य मोक्षस्य उपलब्धये आसीत् परा विद्या। धर्मार्थकामसंसिद्धौ साधनं भवति अपरा।

ब्रह्मचारिणश्च स्वस्वेष्टसिद्ध्यर्थं परमकारुणिकस्य गुरोः समीपं गत्वा विद्योपार्जनं साधयन्ति स्म। पुराकाले गुरोः स्थानं सर्वोत्कृष्टमासीत्। गुरुरपि शरणागते शिष्ये अध्यात्मज्ञानसर्जनात् ब्रह्मा, त्राणात् ज्ञानविज्ञानसंरक्षणाच्च विष्णुः, सकलकलुषसंहरणान्महेश्वरः, तथा परमात्मणः अक्षरस्य ज्ञानप्रदानात् परब्रह्मरूप आसीत्। उक्तञ्च –

> **गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**
> **गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः।।**

शिक्षायाः प्रयोजनमासीत् पुरुषार्थाणां प्राप्तिस्तथा अध्यापनं धर्मार्थशुश्रूषाप्राप्त्यर्थं कार्यते स्म। उक्तञ्च –

> **अध्यापनं च त्रिविधं धर्मार्थं चार्थकारणात्।**
> **शुश्रुषा करणं चेति ऋषिभिः परिकीर्तितम्।।**[4]

आचारग्राहकत्वात्, अर्थाचायकत्वात्, बुद्ध्याचायकत्वाद्वा आचार्य कथ्यते। पुरा आचार्यः शिष्यान् धर्मार्थं अध्यापयन्तः शास्त्रगन्थीनं शिथिलीकृत्य सद्बुद्धिं विकासयति स्म। उक्तं च निरुक्ते – आचार्यः आचारं ग्राहयति। आचिनोति अर्थान्। आचिनोति बुद्धिमिति वा इति। पुराकाले आचार्यः शिष्यमुपनीय

शिष्यान् विद्वांसः साधयितुं वेदोपनिषदादीनि शास्त्राणि अध्यापयन्ति स्म। परन्तु यो धनोपार्जनकाम्यया अध्यापयति स्म स उपाध्यायः इत्युच्यते। उक्तञ्च मनुसंहितायाम् –

**उपनीय तु यः शिष्यं वेदमध्यापयेद्विजः।**
**सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।**
**एकदेशं तु वेदस्य वेताङ्गान्यपि वा पुनः।**
**योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते।।**[5] इति।

पुरा सर्वश्रेष्ठगुरुत्वेन कुलपतिरासीत्। कुलपतेः लक्षणमुक्तमस्ति –

**मुनीनां दशसाहस्रं योऽन्नदानादि पोषाणात।**
**अध्यायपति विप्रर्षिरसौ कुलपतिः स्मृतः।।**

### प्राचीनकाले शिक्षार्थिनां स्वरूपम्

शिष्य-छात्र-विद्यार्थि-अन्तेवासीतिविधया पुरा शिक्षार्थिनां चत्वारः प्रकाराः भवन्ति स्म। शासु अनुशिष्टौ[6] इति धातोः शिष्य-शब्दो निष्पन्नः। यः शासितुं योग्यः स एव शिष्य उच्यते। अनुशासनशीलता एव शिष्यस्य प्रधानं लक्षणम्। यः विद्याभ्यासकाले पूर्णतया अनुशासितो भवति स सामाजिकजीवनेऽपि सम्पूर्णतया साफल्यमर्जयितुं शक्नुयात्।

ये हि केवलं स्वाध्याय-निरताः सन्तः गुरोर्दोषान् आवृत्य गुरोः यशः प्रकाशयन्ति स्म ते छात्राशब्दैरभिधीयन्ते। वस्तुतः गुरोर्दोषाणामावरकत्वेन छत्रत्वम्। तच्छीलं यस्य स छात्रः अभिहितः। अध्ययनकाले स्वशङ्कानां समाधानज्ञानपुरःसरं, धैर्यपूर्वकं समाधानप्रतीक्षणे तत्परत्वं, न तु गुरोः अज्ञानदोषस्य प्रचारणत्वं छात्राणां प्रधानं लक्षणम्।

विद्याया अर्थनं येषां शीलं ते विद्यार्थी इत्युच्यन्ते। विद्यायां पारंगतात् गुरोः ये विद्यां याचन्ते स्म ते विद्यार्थिन उच्यन्ते। विद्यालाभ येषां मुख्यं प्रयोजनमासीत् ते विद्यार्थी भवन्ति स्म। विद्यार्थिनां प्रधानगुणेषु तावत् विद्यां प्रति उत्कटानुरागः, गुरुं प्रति शुश्रुषा चेत्यादयः।

अन्ते वसनं शीलः यस्य स अन्तेवासी। उपगुरु वसन्तः अधीयानः अन्तेवासी इत्युच्यते। न केवलं विद्यार्जने एतेषामभिरुचिरासीदपि तु निरन्तरं गुरुशुश्रूषायाः अवसरग्रहणात् चतुर्विधेषु शिक्षार्थिषु अन्तेवासी सर्वोत्कृष्टः आसीत्।

### प्राचीना शिक्षापद्धतिः

पुरा भारते वर्षे गुरुगृहेषु सर्वविधाः शिष्याः निवसन्ति स्म। तत्र जातिवर्णादिवैषम्यस्य स्थानं नासीत्। तत्र सर्वे एकीभूय अध्ययनं साधयन्ति स्म। तेषामावासभोजनादिव्यवस्थापि निरन्तराला आसीत्। राजपुत्रो वा किङ्करपुत्रो वा सर्वे एकस्यैव गुरोरधीने पठन्तो बभूवुः। तत्र सच्चरित्राणां सुसंस्कृतानां च शिक्षार्थिनाम् एव प्रवेशो गुरुकुले भवति स्म। तत्र पूतवातावरणे वसन्तो विद्यार्थिनः विनयिनः भवन्ति स्म। गुरुगृहे अध्ययने तत्पराः छात्राः सच्चरित्राः, संयमिनः, आचारवन्तः, कर्तव्यनिष्ठाः, सत्यपरायणाः, विनीताः, श्रद्धालवः ब्रह्मचर्यपरायणाः सन्तः देशहितार्थं परिवारहितार्थं समाजहितार्थं च योग्या नागरिका भूत्वा ततो निर्गच्छन्ति स्म।

गुरुकुले गमनाय छात्राणां वयः पञ्चमो वर्ष निर्धारित आसीत्। तत्रैव द्वादशवर्षाणि यावत् अधीयन्तो बभूवुः। तदनु समावर्तनं, ततः स्नातकः। पुराकाले परीक्षाव्यवस्था अद्यतनीया परीक्षाव्यवस्था इव नासीत्। तदा आचार्यैः व्यवहारिकी परीक्षा स्वीक्रियन्ते स्म। तस्य योग्यतापरीक्षणं वाक्यार्थसभायां शास्त्रार्थसभायां क्रियते। एवंरीत्या सत्रान्ते दीक्षान्तसमारोहः भवति स्म। ततः विद्यामादाय यथासम्भवं दक्षिणां गुरवे विनिवेद्य विद्यार्थी गार्हस्थाश्रमं प्रविशति स्म। आगमकालः,स्वाध्यायकालः,प्रवचनकालः,व्यवहारकालः इति चतुर्विधेषु विद्यार्जनकालेषु द्वौ अस्मिन्नेव समये सम्पद्येते। इत्थं प्रक्रिया महर्षिपतञ्जलेः कालपर्यन्तं प्रचलिता आसीत्।

### आधुनिकी शिक्षा

भारते वर्षे आधुनिकी शिक्षा नाम लॉर्ड मेकॉलेमहोदयेन भारते संचालिता शिक्षा। वस्तुतः भारतम् आङ्ग्लजनानामधीनं कर्तुं भारतस्य परम्परां नाशयितुम् एतेन काचन नूतना व्यवस्था प्रारब्धा। भारतीयैरपि बाध्यतया इयं व्यवस्था आलिङ्गितवन्तः। कालानुसारं वैदेशिकशिक्षायाः प्रभावः अद्यापि भारते वर्षे परिदृश्यते। फलतः भौतिकसुखाय वैज्ञानिकशिक्षायाः प्रौद्योगिकशिक्षायाः प्रचारः भारते अधुना वर्धितं वर्तते। वस्तुतः भारतस्य कशेरुकस्वरूपा अध्यात्मविद्या पाश्चात्त्यशिक्षायाः पाश्चात्त्यसंस्कृतेः प्रभावात् निपीडितः अभवत्। एवंरीत्या आधुनिकीं शिक्षां त्रिधा विभङ्क्तुं शक्यम् – वैज्ञानिकी शिक्षा, कलावाणिज्यादिशिक्षा, आध्यात्मिकी वेदोपनिषदादिशिक्षा च।

एतेषु वैज्ञानिकी शिक्षासु अभियान्त्रिकी, प्रौद्योगिकी, संगणकः, चिकित्सा इत्यादयो विषया अन्तर्भवति। वस्तुतः इयं शिक्षा आधिभौतिकाभ्युदये अद्वितीयसाधनस्वरूपा। अत एव मेधाविनश्छात्राः अस्मिन्नेव स्रोतसि शिक्षाग्रहणे अधिकोत्साहिनः दृश्यन्ते।

कलावाणिज्यादिशिक्षा अद्यत्वे दिशाविहीना वर्तते। अत्र मेधाविच्छात्राणामपेक्षया साधारणाः छात्राः एव अधिकतया आविर्भवन्ति। परन्तु कलावाणिज्यादिभिरेव प्रथमकोटिकशिक्षायाः प्रबन्धनम् अनया स्रोतसा एव सम्भवति।

तृतीयकोटिका शिक्षा या पुरा सर्वोच्चस्थाने आसीत्, नाधुना सर्वकारेण तस्या रक्षा क्रियते न वा समाजेन तस्य गुरुत्वमवगम्यते। तेन इयं उपेक्षिता अधोगतिं चापन्ना।

### आधुनिकशिक्षायाः स्थितिः उपक्षेपाश्च

उद्देश्यविहीनशिक्षायाः परिणामः श्रेयस्करो न भवति। अतः शिक्षायाः उद्देश्यानि भवेत् – पूर्णमानवताप्राप्तिः। मानवता नाम मानवे आधिभौतिकवादेन सह अध्यात्मवादस्य पूर्णसमन्वयः, सामञ्जस्यं सन्तुलनञ्च। अध्यात्मविद्याभावात् मनुष्येषु स्वार्थपरता, कपटता, परहिंसापरायणता इत्यादीनामासुरगुणानां वर्धनं जायते। एतेन समाजोऽपि भङ्गो भवति। तेन शिक्षाद्वारा मानवजीवनस्य महत्त्वादर्शस्य ज्ञानमपेक्षते। शिक्षया चरित्रस्य निर्माणं साधनीयम्, ज्ञानार्जने सामर्थ्यं स्यात्, समुचितजीविकोपार्जनकौशलं, सत्यासत्यपरिज्ञानं, समाजपरम्परामान्यतादिज्ञानं च अर्जयेत्।

साम्प्रतं शिक्षा प्राथमिक-माध्यमिक-उच्चमाध्यमिकस्तरेषु विभज्य व्यवस्थिता सर्वकारेण। स्वतन्त्रतायाः पूर्वं 11+2+2+2=17 वर्षाणि इति रीत्या सप्तदशवर्षाणि यावत् पाठ्यक्रम आसीत्। ततः

12+1+2+2=17 इति तथा 11+1+3+2=17 इति रीत्या पाठ्यक्रमोऽभूत्। इदानीं 10+2+3+2=17 इत्येवं सप्तदशवर्षात्मकः पाठ्यक्रमः संचाल्यते। एतत्परिवर्तनेन कोऽपि अपूर्वश्चमत्कारः नागतः इति शिक्षाविदां मतम्।

**शिक्षायां संस्कृतभाषायाः अवस्थितिः**

शिक्षामाध्यमस्य रूपमद्यापि माध्यमिकस्तरे अनिश्चितम्। देशस्य सर्वथोन्नतये निरतामपेक्षिता संस्कृतभाषा सामाजिकैः ब्रिटिश-शासनप्रभावात् सम्पूर्णतया उपेक्षिताद्य। पूर्वं स्वतन्त्रतायाः संस्कृत-भाषा केषुचित्स्तरेषु यद्यपि अनिवार्यतया पाठ्यते स्म। तथापि स्वतन्त्रोत्तरभारते संस्कृतभाषायाः उपेक्षा सर्वकारप्रभावाद्वा उद्योग-क्षेत्रे अवसराभावाद्वा जनैः उपेक्षितत्वेन दृश्यते। संस्कृतज्ञेष्वपि संस्कृतस्य वैशिष्ट्यस्य गुणगानं कुर्वन्तः अपि व्यवहारिकदशायां तथा अभिरुचिर्न दरीदृश्यते। बहुषु पुस्तकेषु मानवीयमूल्यानां अध्यात्मतत्त्वानां महत्त्वं यद्यपि प्रकटितं वर्तते, तथापि तत्प्राप्तये क्वापि सरलतमोपायः संस्कृतभाषाभ्यासः उपेक्षितो भवति।

**शिक्षायां नवीनशिक्षानीतेः प्रभावः (NEP 2020)**

नवीनशिक्षानीतेः केचन मुख्यविन्दवः

- नवीनशिक्षानीतौ शिक्षाव्यवस्था 5+3+3+4 इति स्तरे विभाजिता।
- पञ्चकक्षापर्यन्तं मातृभाषायां शिक्षणं करणीयम्।
- षष्ठकक्ष्यायाः प्रभृति व्यवसायिकशिक्षायाः कोर्डिंग् इत्यस्य च पाठः।
- पाठ्यविषयाणां नाम्यता। (छात्राः विज्ञानं, कला, वाणिज्यं, च सम्यक् संयोज्य पठितुं शक्नुवन्ति)
- मूल्याङ्कनपद्धतौ आत्ममूल्याङ्कनं सहपाठी-मूल्याङ्कनं च शिक्षकेन सह समाहितं जातम्।
- उच्चशिक्षायां परिवर्तनमागतम्। तथाहि विश्वविद्यालयानां स्वायत्तता, विविधविषयात्मकं शिक्षणं, क्रेडिट-प्रणाली च स्थापिता।
- विदेशीयविश्वविद्यालयानां भारतवर्षे स्थापनायै अनुमतिः।

इत्थं करणेन व्यवसायोन्मुखशिक्षायाः भूमिका भवति। अन्यथा आधुनिक-स्नातकाः स्नातकोत्तरपरीक्षोत्तीर्णा अपि जीविकोपार्जने असमर्थाः भवन्ति। एतेषेव जनानां प्रोन्नत्यै नवीनशिक्षानीतौ विविधविषयेषु नाम्यता आयोजिता। एतत्करणेन भारतीयज्ञान-परम्परायाः पुनर्निरीक्षणं स्यात्। तेन शिक्षया मूल्यबोधः सञ्जायेत। तथापि आधुनिकपरिप्रेक्ष्ये शिक्षाक्षेत्रेषु अधोलिखितानि परिवर्तनानि नितरामपेक्षते –

- शिक्षायाः प्रत्येकक्षेत्रे समाजोपयोगिनः आध्यात्मिकज्ञानाय आवश्यकतायाः शिक्षायाः अनिवार्यत्वम्। आत्मात्मिकज्ञानेन सह आधिभौतिकज्ञानस्य परस्परसामञ्जस्येन सन्तुलनेन च विद्यार्थिनः अधिकज्ञानिनः स्युः।
- माध्यमिककक्षां यावत् संस्कृतभाषा अनिवार्यत्वेन स्यात्।
- अभिरुच्यनुसारं जीविकोपार्जनकौशलसम्पादनाय अपि शिक्षा आवश्यिकी।
- माध्यमिकशिक्षायाः अनिवार्यत्वम्।
- गुरु-शिष्ययोः अध्ययनाध्यापनोन्मुखीकरणम्।
- सम्पन्न-विपन्नच्छात्रयोः प्राथमिकशिक्षायां वर्तमानस्तरतारतम्यस्य यथासंभवं स्वल्पीकरणम्।

इत्थं परिवर्तनानि कर्तुं शक्यन्ते चेदेव शिक्षाक्षेत्रे साफल्यमागच्छेत्। तथा च भारतस्य प्राचीनगौरवं च पुनर्जायेत इति शिवम्।

**परिशीलितग्रन्थसूची**

केनोपनिषत् (शंकर भाष्य सहित), गीताप्रेस, गोरखपुर।

कठोपनिषत्, गीताप्रेस, गोरखपुर वि.सं. 2016।

छान्दोग्योपनिषत् (शांकर भाष्य), गीताप्रेस गोरखपुर।

पञ्चतन्त्र, विष्णुशर्मा, बम्बई 1936।

प्राचीन एवं अर्वाचीन शिक्षा पद्धति, प्रो. नागेन्द्र झा, अभिषेक प्रकाशन 2013।

पाणिनीय शिक्षा, (हिन्दे व्याख्या सहित) प्र.सं., श्री पाणिनी-मुनि विरचित चौखम्बा ओरयण्टालिया वाराणसी 1978।

भगवद्गीता, गीताप्रेस गोरखपुर।

मनुस्मृतिः, मनुः, सं.पं. श्री गोपाल शास्त्री नेने चौखम्बा संस्कृत सीरीज वाराणसी।

**संदर्भः**

1. पाणिनीयधातुपाठः, 01.689
2. ईशावास्योपनिषद् - 07
3. मुण्डकोपनिषद् – 1.1.4
4. हारीतः
5. मनुसंहिता – 2.140, 141
6. पाणिनीयधातुपाठः, 02.70